कहवि निरुद्धसोगावेगा अणवरयनिस्सरंतनयणंसुबिंदुजालच्छलेण पणयप्पब्भारं व चिरं उग्गिरिऊण भणिउमाढत्ता-'भयवं! तुम्ह एवं भणंता वज्जमया धुवं अम्ह सवणा जं न संपत्ता बहिरत्तणं, वइरसारप्परमाणुविणिम्मियं हिययं जं न वच्चइ तडत्ति सयसिक्करत्तणं, निद्दक्खिन्नत्तणपरममंदिरं व सरीरमिमं जमज्जवि न पवज्जइ रसायलगमणं। एवं ठिए य कहं पत्थुयत्थाणुमन्नणनिमित्तं पयट्टउ वराइणी वाणी, जओ-को होही विसमकज्जोयहिनिवडिराण अम्ह हत्थावलंबो?, कहं वा ससुरासुर-नरनरिंदसंदोहवंदणिज्ज-पायपंकेरुहेण तुमए विरहियं भुवणत्तयपयंडं सोहिस्सइ नायखत्तियकुलं? अहो महामंदभागिणो अम्हे जेसिं करयलाओऽवि अवक्कमइ रयणं'ति। एवमाईणि कलुणवयणाणि भासिऊण निरभिलासा चेव निवडिऊण चलणेसु भगवओ विन्नत्तिं काउं पवत्ता-

'जइवि जिणनाह! तुम्हे पव्वज्जं काउमुज्जमह इण्हिं।
तहविहु अम्ह सुहट्ठा पडिवज्जह निक्खमणमहिमं' ।।१।।

निरुद्धशोकाऽऽवेगाः अनवरतनिस्सरन्नयनाऽश्रुबिन्दुजालच्छलेन प्रणयप्राग्भारं च चिरम् उद्गीर्य भणितुमारब्धवन्तः 'भगवन्! तव एवं भणन्तः वज्रमये ध्रुवम् अस्माकं श्रवणे यन्न सम्प्राप्ते बधिरत्वम्, वज्रसारपरमाणुविनिर्मितं हृदयं यन्न व्रजति तडिति शतशर्करताम्, निर्दाक्षिण्यत्वपरममन्दिरमिव शरीरमिदं यद् अद्यापि न प्रव्रजति रसातलगमनम्। एवं स्थिते च कथं प्रस्तुतार्थाऽनुमननिमित्तं प्रवर्तेत वराकी वाणी यतः कः भविष्यति विषमकार्योदधिनिपतताम् अस्माकं हस्तावलम्बः?, कथं वा ससुराऽसुर-नरनरेन्द्रसन्दोह-वन्दनीयपादपङ्करुहेन त्वया विरहितं भुवनत्रयप्रचण्डं शोभिष्यते ज्ञातक्षत्रियकुलम्? अहो!, महामन्दभागिनः वयं येषां करतलादपि अपक्रमते रत्नम्' इति। एवामादीनि करुणवचनानि भाषित्वा निरभिलाषाः एव निपत्य चरणयोः भगवन्तं विज्ञप्तिं कर्तुं प्रवृत्ताः-

'यद्यपि जिननाथ! त्वं प्रव्रज्यां कर्तुमुद्यतः इदानीम्।
तथाऽपि खलु अस्माकं सुखाय प्रतिपद्यस्व निष्क्रमणमहिमानम्' ।।१।।

પ્રવાહના મિષે જાણે લાંબા વખતના 'સ્નેહ-સમૂહને બહાર કહાડી બતાવતા હોય તેમ તેઓ કહેવા લાગ્યા કે-'હે ભગવન! તમે એમ બોલો છે, છતાં અમારા શ્રવણો ખરેખર વજ્રમય છે કે જેથી બહેરા થતા નથી, અમારું હૃદય વજ્રથી બનાવેલ લાગે છે કે જેથી તડતડાટ દઇને શતખંડ થતું નથી, અમારું આ શરીર નિર્દાક્ષિણ્યનું ઉત્કૃષ્ટ સ્થાન છે કે જેથી અદ્યાપિ તે જમીનમાં જતું નથી. એમ છે તો પ્રસ્તુત કાર્યની અનુજ્ઞા નિમિત્તે એ વરાક વાણી કેમ પ્રવર્ત્તે? કારણ કે વિષમ કાર્યરૂપ ઉદધિમાં પડતાં અમોને હસ્તાવલંબન કોણ? અથવા સુરાસુર અને નરેંદ્રોને વંદનીય ચરણકમળવાળા એવા આપ વિના ત્રણે ભુવનમાં પ્રચંડ આ જ્ઞાત-ક્ષત્રિયકુળને કોણ શોભાવશે? અહો! અમારાં મંદભાગ્ય કે જેમના કરતલ થકી પણ આ રત્ન ચાલ્યું જાય છે.' એ રીતે ભારે ખેદયુક્ત વચન બોલી, આશારહિત બનેલા તેઓ પગે પડીને પ્રભુને વિનવવા લાગ્યા કે-

'હે ભગવન્! જો કે અત્યારે તમે પ્રવ્રજ્યા લેવાને તત્પર થયા છો, છતાં અમારા સુખ નિમિત્તે નિષ્ક્રમણ-મહોત્સવ કબૂલ કરો.' (૧)

तेसिं उवरोहेणं तओ जिणिंदो इमंपि पडिसुणइ।
अब्भत्थणभंगपरंमुहाइं हिययाइं गरुयाणं ।।२।।

अह नंदिवद्धणनरिंदेण भणिया नियपुरिसा-'अरे सिग्घं महरिहं भगवओ अणुरूवं अभिसेओवगरणं उवाहरेह।' 'जं देवो भणइ'त्ति सम्मं पडिसुणिऊण निग्गया पुरिसा। पउणीकया अट्ठोत्तरसहस्ससंखा अणेगे सुवन्नाइकलसा, उवाहरियाइं समत्थपसत्थतित्थसमुत्थाइं सलिलाइं, उवणीयाओ परमोसहीओ, पणामिया गोसीसचंदणाइविलेवणविसेसा।

एत्थंतरे चलियासणा बत्तीसंपि पुरंदरा विम्हियमणा ओहिणाणसामत्थमुणियपरमत्था तक्खणं महप्पमाणविमाणारूढा, वियसियसयवत्तविसाललोयणा, अद्दचंदणाणुलित्तगत्ता, नियंसियसिलंधपुप्फसुहफरिसपवरदूसरयणा, कुंद-संखदल-दगरयधवलदंतपंतिरेहंतवयणा,

---

तेषाम् उपरोधेन ततः जिनेन्द्रः इदमपि प्रतिश्रुणोति।
अभ्यर्थनाभङ्गपराङ्मुखाणि हृदयानि गुरुकाणाम् ।।२।।

अथ नन्दिवर्धननरेन्द्रेण भणिताः निजपुरुषाः 'अरे! शीघ्रं महार्हं भगवतः अनुरूपम् अभिषेकोपकरणम् उपाऽऽहरत।' 'यदेवः भणति' इति सम्यग् प्रतिश्रुत्य निर्गताः पुरुषाः। प्रगुणीकृताः अष्टोत्तरसहस्रसंङ्ख्याः अनेके सुवर्णादिकलशाः, उपाहृतानि समस्तप्रशस्ततीर्थसमुत्थानि सलिलानि, उपनीताः परमौषध्यः, अर्पिताः गोशीर्षचन्दनादिविलेपनविशेषाः।

अत्रान्तरे चलिताऽऽसनाः द्वात्रिंशद् अपि पुरन्दराः विस्मितमनसः अवधिज्ञानसामर्थ्यज्ञातपरमार्थाः तत्क्षणं महाप्रमाणविमानाऽऽरुढाः, विकसितशतपत्रविशाललोचनाः, आर्द्रचन्दनाऽनुलिप्तगात्राः, निवसितशिलीन्ध्रपुष्पसुखस्पर्शप्रवरदूष्यरत्नाः, कुन्द-शङ्खदलोदकरजधवलदन्तपङ्क्तिराजमानवदनाः,

---

એમ તેમના આગ્રહથી ભગવંતે તે સ્વીકાર્યું. કારણ કે મહંત જનોનાં હૃદયો પ્રાર્થના-ભંગમાં વિમુખ હોય છે. (૨)

પછી નંદિવર્ધન રાજાએ પોતાના પુરુષોને હુકમ કર્યો કે-'અરે! તમે સત્વર ભગવંતને યોગ્ય મહાકિંમતી અભિષેકનાં સાધન તૈયાર કરો.' એટલે 'જેવી આપની આજ્ઞા' એમ જણાવી તે પુરુષો ગયા અને તેમણે સુવર્ણાદિકના એક હજાર ને આઠ કળશો તૈયાર કર્યા, સમસ્ત પ્રશસ્ત તીર્થોનું જળ તેમજ પરમ ઔષધિઓ લઇ આવ્યા; અને ગોશીર્ષચંદનાદિકનું વિલેપન તૈયાર કર્યું.

એવામાં આસનો ચલાયમાન થતાં વિસ્મય પામી, અવધિજ્ઞાનથી પરમાર્થ જાણી, તત્કાળ મોટાં વિમાનો પર આરૂઢ થઇ, વિકાસ પામતા શતપત્ર કમળ જેવાં જેમના વિશાલ લોચન છે, આર્દ્ર ચંદનવડે લિપ્ત શરીરવાળા, શિલીન્દ્ર વૃક્ષના પુષ્પો તથા કોમળ સ્પર્શ યુક્ત દેવદૂષ્યવડે વિરાજમાન, કુંદ, શંખદળ, જલબિન્દુ સમાન ધવલ

अंजणपुंजघणमसिणरुयगरमणिज्जकेसपासा, भद्दजोव्वणे वट्टमाणा, मऊहपडलपल्लविय-चूडामणिपसाहियमत्थया, अणेगरूवाभरणभूसियसरीरा, सोमचारुरूवा छत्तचिंधाइ-विविहककुहधारिणो, असंखदेवकोडिचडगरपरियरिया, पडह-मुइंग-काहल-तिलिम-हुडक्काइ-तूररवभरियंबरा जिणिंदस्स अंतियं समागया, तिपयाहिणादाणपुव्वगं च पणमिऊण पराए भत्तीए पहूणो पायपंकयं कयत्थमप्पाणं मन्नंता जिणचरणमुद्दाविन्नाससुंदरे निसन्ना भवणंगणे।

अह अच्चुयामरिंदेण हरिसुल्लसंतदेहेण भणिया नियनियदेवा-'भो सिग्घमेव निव्वत्तह जिणस्स महावीरस्स जोग्गं महंतं निक्खमणाभिसेयं।' ते य एयमायन्निऊण कयपणामा अणेगकणयाइकलसे खीरोयसलिलपडिपुन्ने, असंखपुप्फपडलाइं च, अन्नं च तहप्पगारमभिसेय-पाओग्गं पहाणवत्थुनिवहं अच्चुयसुराहिवस्स पणामेंति, तओ अच्चुयतियसाहिवो सयलनिय-

---

अञ्जनपुञ्जघनमसृणरोचकरमणीयकेशपाशाः, भद्रयौवने वर्तमानाः, मयूखपटलपल्लवितचूडामणि-प्रसाधितमस्तकाः, अनेकरूपाऽऽभरणभूषितशरीराः, सौम्यचारुरूपाः, छत्रचिह्नादिविविधककुभ्धारिणः, असङ्ख्यदेवकोटिसमूहपरिवृत्ताः, पटह-मृदङ्ग-काहल-तिलिम-हुडक्कादितूररवभृताऽम्बराः जिनेन्द्रस्य अन्तिकं समागताः, त्रिप्रदक्षिणादानपूर्वकं च प्रणम्य परया भक्त्या प्रभोः पादपङ्कजं कृतार्थमात्मानं मन्यमानाः जिनचरणमुद्राविन्यासमुन्दरे निषन्नाः भवनाङ्गणे।

अथ अच्युताऽमरेन्द्रेण हर्षोल्लसद्देहेन भणिताः निजनिजदेवाः 'भोः! शीघ्रमेव निर्वर्तध्वम् जिनस्य महावीरस्य योग्यं महद् निष्क्रमणाऽभिषेकम्। ते च एवमाकर्ण्य कृतप्रणामाः अनेककनकादिकलशान् क्षीरोदसलिलपरिपूर्णान्, असङ्ख्यपुष्पपटलानि च, अन्यच्च तथाप्रकारम् अभिषेकप्रायोग्यं प्रधानवस्तुनिवहम् अच्युतसुराधिपस्य अर्पयन्ति। ततः अच्युतत्रिदशाधिपः सकलनिजदेवपरिवृत्तः तैः दिव्यैः कनकादिकुम्भैः

દંતપંક્તિથી જેમનાં મુખ શોભતાં છે, અંજનપુંજ સમાન અને બહુ જ સ્નિગ્ધ અને ચળકતા કેશપાશવડે શોભતા, ભદ્ર-યૌવનમાં વર્ત્તતા, કિરણ-સમૂહથી ચળકતા મુગટ જેમના શિરે ભાસમાન છે, અનેક આભરણોવડે શરીરે જેઓ વિભૂષિત છે, સૌમ્ય અને સુંદર રૂપ યુક્ત, છત્ર, ધ્વજાદિક વિવિધ ચિહ્નોને દિશાઓમાં ધારણ કરતા, અસંખ્ય અનુચર દેવકોટીવડે પરિવૃત, પટહ, મૃદંગ, કાહલ, તિલિમ, હુડકાદિક વાજિંત્રોના નાદવડે આકાશને પૂરતા એવા બત્રીશે ઇંદ્રો જિનેશ્વર પાસે આવ્યા અને ત્રણ પ્રદક્ષિણાપૂર્વક પરમાત્માના ચરણકમળમાં પ્રણામ કરી, પરમ ભક્તિથી પોતાના આત્માને કૃતાર્થ માનતા, જિનચરણની મુદ્રાના વિન્યાસવડે સુંદર એવા ભવનાંગણે તેઓ બેઠા.

ત્યાં હર્ષથી વિકાસ પામતા અચ્યુતેંદ્રે પોતાના દેવોને આજ્ઞા કરી કે-'અરે દેવો! તમે શીઘ્ર મહાવીર પ્રભુને યોગ્ય મહાન્ નિષ્ક્રમણ-અભિષેકની સામગ્રી તૈયાર કરો.' એટલે તેમણે પ્રણામ કરી, અનેક કનકાદિના કળશો ક્ષીરોદકથી ભરી, અસંખ્ય પુષ્પો તેમજ અન્ય અભિષેકને યોગ્ય તથાપ્રકારની પ્રધાન વસ્તુઓ લાવી અચ્યુતેંદ્રને અર્પણ કરી. પછી અચ્યુતેંદ્રે પોતાના બધા પરિવાર સહિત તે દિવ્ય કનકાદિના એક હજાર ને આઠ કળશો કે જે

देवपरियरिओ तेहिं दिव्वेहिं कणयाइकुंभेहिं अट्ठसहस्ससंखेहिं दिव्वोसहिसुगंधगंधुम्मिस्सेहिं मंदिरट्ठियं भयवंतं हरिसवियसियवयणो अभिसिंचइ। एवं कमेण सेसावि सुराहिवइणो चंद-सूरपज्जंता ण्हवंति जयगुरुं, अह तेसु मज्जणं काऊण सट्ठाणट्ठिएसु नंदिवद्धणो राया कयमुहकोसविन्नासो परेणं विणएणं अच्चंतमप्पमत्तचित्तो तेहिं पुव्वोवणीएहिं चामीयराइकलससहस्सेहिं गंधुद्धुरपवरतित्थजलभरिएहिं मज्जेइ जिणवरं, तहा वट्टमाणे य भगवओ मज्जणमहूसवे केइ सुरिंदा चालिंति मंदं मंदं चामीयरदंडुड्डामराओ चामराओ, केवि धारिंति नियधवलिमाविजियसियसयवत्ताइं आयवत्ताइं, केवि संमुहमभिट्ठाविंति पणट्ठखंपणं पवरदप्पणं, केवि करयलेणुव्वहंति सुगंधखीरोयसलिलपुन्नपिहाणपउमगंधुक्कडे कुडे, केवि उप्पाडेंति डज्झंतागुरुघणसारसुरहिधूवधूमंधयारलंछियं पंचवन्नरयणधूवकडुच्छुयं, केवि समुव्वहंति परिमलमिलंतालिसामलाओ दसद्धवन्नकुसुममालाओ, अन्ने देवा य देवीओ य

अष्टसहस्रसङ्ख्यैः दिव्यौषधिसुगन्धगन्धोन्मिश्रैः मन्दिरस्थितं भगवन्तं हर्षविकसितवदनः अभिसिञ्चति। एवं क्रमेण शेषाः अपि सुराधिपतयः चन्द्र-सूर्यपर्यन्ताः स्नापयन्ति जगद्गुरुम्। अथ तेषु मज्जनं कारयित्वा स्वस्थानस्थितेषु नन्दिवर्धनः राजा कृतमुखकोशविन्यासः परेण विनयेन अत्यन्तमप्रमत्तचित्तः तैः पूर्वोपनीतैः चामीकरादिकलशसहस्रैः गन्धोद्धूरप्रवरतीर्थजलभृतैः मज्जयति जिनवरम्। तथा वर्तमाने च भगवतः मज्जनमहोत्सवे केऽपि सुरेन्द्राः चालयन्ति मन्दं मन्दं चामीकरदण्डोद्भटानि चामराणि, केऽपि धारयन्ति निजधवलिमाविजितश्वेतशतपत्राणि आतपत्राणि, केऽपि सम्मुखम् अभिस्थापयन्ति प्रणष्टखम्पणम् (? कल्पनम्) प्रवरदर्पणम्, केऽपि करतलेन उद्वहन्ति सुगन्धक्षीरोदसलिलपूर्णविधानपद्मगन्धोत्कटान् कुटान्, केऽपि उर्ध्वीकुर्वन्ति दह्यमानगुरुघनसारसुरभिधूपधूमान्धकारलाञ्छितं पञ्चवर्णरत्नधूपकटुच्छकम्, (=धूपियुं इति भाषायाम्), केऽपि समुद्वहन्ति परिमलमिलदलिश्यामाः दशार्धवर्णकुसुममालाः, अन्ये देवाश्च

દિવ્ય ઔષધિ તથા સુગંધવડે વ્યાપ્ત હતા તેવડે ભારે હર્ષ પામતા તેણે ભવનમાં રહેલા ભગવંતનો અભિષેક કર્યો. એમ અનુક્રમે ચંદ્ર, સૂર્યપર્યંત બીજા પણ ઇંદ્રોએ પ્રભુનો અભિષેક કર્યો. પછી મજ્જન કરી તેઓ સ્વસ્થાને બેઠા એટલે મુખકોશ બાંધી, પરમ વિનયપૂર્વક, અત્યંત અપ્રમત્તભાવે, પોતે પૂર્વે તૈયાર કરેલા તે કનકાદિકના ગંધ તથા પ્રવર તીર્થોના જળે ભરેલા કળશોવડે નંદિવર્ધન રાજાએ જિનેશ્વરને મજ્જન કરાવ્યું. એમ ભગવંતનો મજ્જન-મહોત્સવ પ્રવર્ત્તતાં કેટલાક ઇંદ્રો કનકદંડવાળાં ચામરો મંદ મંદ ચલાવવા લાગ્યા, કેટલાક શ્વેત કમળો કરતાં અધિક ધવલ છત્રો, કેટલાક પ્રવર દર્પણ સન્મુખ ધરવા લાગ્યા, કેટલાક સુગંધી ક્ષીરોદક-પૂર્ણ અને સુગંધી પદ્મોવડે ઢાંકેલા એવા કળશો કરતલમાં ધરીને ઉભા, કેટલાક અગરૂ, ઘનસાર પ્રમુખ બળતા ધૂપના ધૂમાંધકારયુક્ત પાંચ વર્ણના રત્નની ધૂપિયાં લઇને ઉભા, કેટલાક ઇંદ્રો પરિમલને લીધે એકઠા થતા ભમરાઓવડે શ્યામ એવી પંચવર્ણની પુષ્પમાળાઓ ધરીને ઉભા રહ્યા તેમજ બીજા દેવ-દેવીઓ પ્રભુની અભિમુખ રહીને ઉપાસના કરવા લાગ્યા. એમ

भगवंतं अभिमुहट्ठियाओ पज्जुवासिंति। अह निव्वत्तियम्मि मज्जणे नंदिवद्धणो राया दोच्चंपि उत्तरावक्कमणं सीहासणं विरयावेइ, तत्थट्ठियं च भयवंतं सेयापीयकलसेहिं ण्हवेइ। तयणंतरं च णं अलंकारियस्स पुव्वाभिमुहसीहासणसन्निसन्नस्स सामिणो सुरभिसुकुमाल-गंधकासाइलूहियसरीरस्स, गोसीससरसचंदणचच्चियंगस्स, परिहियनिरुवहयफलिहुज्जल-दिव्वदेवदूसजुयलस्स, निबद्धपंचरायरयणकडिसुत्तयस्स, कणगसेलसिलाविच्छिन्नवच्छत्थ-लघोलंतविमलमुत्ताहलकलावस्स, विचित्तमणिखंडमंडियकुंडलुज्जोवियगंडयलस्स, रयणुक्कडकिरीडविभूसियसिरस्स, पंचवन्नपुप्फमालालंकियस्स, पाक्खित्तसुगंधवरवासस्स भगवओ वद्धमाणस्स वंदिऊण चलणजुयलं सुरासुरिंदा पुणो पुणो धरणियलनामिउत्तिमंगा आसीसासएहिं थुणिउं पवत्ता, कहं?-

---

देव्यश्च भगवन्तम् अभिमुखस्थिताः पर्युपासन्ते। अथ निर्वर्तिते मज्जने नन्दिवर्धनः राजा द्वितीयमपि उत्तराऽवक्रमणं सिंहासनं विरचयति, तत्रस्थितं च भगवन्तं श्वेताऽऽपीतकलशैः स्नापयति। तदनन्तरं च अलङ्कारितस्य पूर्वाभिमुखसिंहासनसन्निषण्णस्य स्वामिनः सुरभिसुकुमालगन्धकाषायरूक्षीकृतशरीरस्य, गोशीर्षसरस-चन्दनचर्चिताङ्गस्य, परिहितनिरूपहतस्फटिकोज्वलदिव्यदेवदूष्ययुगलस्य, निबद्धपञ्चराग-रत्नकटिसूत्रकस्य, कनकशैलशिलाविस्तीर्णवक्षस्थलघोलयद्विमलमुक्ताफलकलापस्य, विचित्रमणिखण्ड-मण्डितकुण्डलोद्योतितगण्डतलस्य, रत्नोत्कटकिरीटविभूषितशिरसः, पञ्चवर्णपुष्पमालालङ्कृतस्य, प्रक्षिप्तसुगन्धवरवासस्य भगवतः वर्धमानस्य वन्दित्वा चरणयुगलं सुरासुरेन्द्राः पुनः पुनः पृथिवीतलनामितोत्तमङ्गाः आशिर्शतैः स्तोतुं प्रवृत्ताः। कथम् -

---

મજ્જન નિવૃત્ત થતાં નંદિવર્ધન રાજાએ ઉત્તર દિશામાં બીજું સિંહાસન રચાવ્યું. ત્યાં બિરાજમાન થયેલા પ્રભુને તેણે ચાંદીના અને સોનાના કળશોવડે ન્હવરાવ્યા અને આભૂષણોથી અલંકૃત થયેલા, સિંહાસન પર પૂર્વાભિમુખ વિરાજમાન વીરને સુગંધી અને સુકુમાળ વસ્ત્રવડે અંગ લુંછી, શરીરે બાવનાચંદન-રસનું વિલેપન કરી, અખંડ સ્ફટિક સમાન ઉજ્વળ દેવદૂષ્ય-યુગલ પહેરાવી, પંચવિધ રત્નનું કટિસૂત્ર બાંધી, કનકાચલની શિલા સમાન વિસ્તીર્ણ વક્ષસ્થળે સહતી વિમલ મુક્તાફળોનો હાર પહેરાવી, કપોલને ઉત્તેજિત કરનાર એવા વિચિત્ર મણિ-મંડિત કુંડલ પહેરાવી, કીંમતી રત્નનો મુગટ માથે ધરાવી, પાંચ પ્રકારના પુષ્પની માળાવડે અલંકૃત કરી તથા સુગંધી પ્રવર વર્ષા કરી, પ્રભુના ચરણયુગલને વંદન કરી, વારંવાર ધરણીતલ સુધી મસ્તક નમાવી, સેંકડો આશિષો આપતા સુરાસુરના ઇંદ્રો આ પ્રમાણે ભગવંતની સ્તુતિ કરવા લાગ્યા-

'विजयसु जएक्कबंधव! ससुरासुरतिहुयणेणवि अजेयं।
अच्चंतमहल्लं मोहमल्लमचिरेण लीलाए ।।१।।

मिच्छत्ततिमिरमुच्छिंदिऊण सन्नाणसूरकिरणेहिं।
पयडेसु मुत्तिमग्गं विमग्गलग्गाण भव्वाण ।।२।।

पालेसु समणधम्मं चिरकालं जाव निग्गयपयावो।
अजियं जिणेसु मज्झे जियस्स निवससु तुमं नाह! ।।३।।

तुह अणवरयं गुणनिवहकित्तणारावओ विबुहलोगो।
सव्वत्तो दिसिवलयं पकुणउ कोऊहलाउलियं ।।४।।

तुज्झ जसो कुमुओयरगोरो भुवणत्तएवि हिंडंतो।
सव्वत्तो उग्गयचंदबिंबसोहं समुव्वहउ ।।५।।

'विजय जगदेकबान्धव! ससुराऽसुरत्रिभुवनेनाऽपि अजेयम्।
अत्यन्तमहान्तं मोहमल्लम् अचिरेण लीलया ।।१।।

मिथ्यात्वतिमिरमुच्छिद्य सज्ज्ञानसूर्यकिरणैः।
प्रकटय मुक्तिमार्गं विमार्गलग्नानां भव्यानाम् ।।२।।

पालय श्रमणधर्मं चिरकालं यावद् निर्गतप्रतापः।
अजितं जय मध्ये जीवस्य निवस त्वं नाथ! ।।३।।

तव अनवरतं गुणनिवहकीर्तनाऽऽरावतः विबुधलोकः।
सर्वतः दिग्वलयं प्रकुर्वन्तु कुतूहलाऽऽकुलितम् ।।४।।

तव यशः कुमुदोदरगौरं भुवनत्रयेऽपि हिण्डमानम्।
सर्वतः उद्गतचन्द्रबिम्बशोभां समुद्वहतु ।।५।।

'હે જગતના એક બાંધવ! સુરાસુર સહિત ત્રિભુવનને પણ અજેય અને અત્યંત મહાન્ એવા મોહ-મલ્લને તમે અલ્પ કાળમાં લીલામાત્રથી જીતો. (૧)

મિથ્યાત્વતિમિરને જ્ઞાન-રવિના કિરણોવડે ઉચ્છેદી, વિમાર્ગે લાગેલા ભવ્યોને માટે તમે મુક્તિ-માર્ગ પ્રગટ કરો. (૨)

ચિરકાલ શ્રમણ-ધર્મનું પાલન કરો. કેવળજ્ઞાન પ્રાપ્ત ન થાય તે દરમ્યાન અજિત રાગદ્વેષાદિકનો જય કરો અને હે નાથ! સદા અમારા અંતરમાં વાસ કરો. (૩)

વિબુધ-દેવો તમારા ગુણસમૂહને સતત ગાતાં ધ્વનિઓથી સર્વત્ર દિશાઓને કુતૂહલવાળી=શબ્દમય બનાવો. (૪)

કુમુદના કેસરા સમાન તમારો ગૌરયશ, ત્રણે ભુવનમાં પ્રસરતાં સર્વત્ર ઉગતા ચંદ્રબિંબની શોભાને ધારણ કરો. (૫)

सिंहस्स व तुह अच्चंतविक्कमं पेच्छिऊण तरलच्छा।
भीया कुतित्थियमिगा एत्तो दूरे पलायंतु' ।।६।।

इय आसीवायपुरस्सराहिं थुणिउं गिराहिं भुवणगुरुं।
नट्टविहिं च पयट्टिय विरयंमि सुरिंदविंदंमि ।।७।।

भावियजयगुरुविरहग्गिदूमिओ नंदिवद्धणो राया।
वाहरिउं नियपुरिसे पयंपिउं एवमाढत्तो ।।८।। जुम्मं।

'भो भो देवाणुपिया! जगपहुणो निमित्तं विसिट्ठवेइगापरिक्खित्तपरिसरं, सरसचंदणुम्मिस्सघुसिणरसालिहियविविहसत्थियं, थिरनिवेसियसपायपीढनानामणिमयसीहासणं, रणंतकणयकिंकिणीमहुरनिनायमुहलियदियंतरं, रंगंतविविहचिंधसयसंपुन्नं, पन्नासधणुहायामं,

---

सिंहस्य इव तव अत्यन्तविक्रमं प्रेक्ष्य तरलाक्षाः।
भीताः कुतीर्थिकमृगाः एतस्माद् दूरं पलायन्तु' ।।६।।

इति आशीर्वादपुरस्सराभिः स्तुत्वा गिर्भिः भुवनगुरुम्।
नाट्यविधिं च प्रवर्तयित्वा विरते सुरेन्द्रवृन्दे ।।७।।

भाविजगद्गुरुविरहाऽग्निदूतः (=दुःखितः) नन्दिवर्धनः राजा।
व्याहृत्य निजपुरुषान् प्रजल्पितुम् एवमारब्धवान् ।।८।। युग्मम्।

भोः भोः देवानुप्रियाः! जगत्प्रभोः निमित्तं विशिष्टवेदिकापरिक्षिप्तपरिसराम्, सरसचन्दनोन्मिश्रघुसृणरसाऽऽलिखितविविधस्वस्तिकाम्, स्थिरनिवेषितसपादपीठनानामणिमयसिंहासनाम्, रणत्कनककिङ्किणीमधुरनिनादमुखरितदिगन्तराम्, रङ्गयुत(=कृत)विविधचिह्नशतसम्पूर्णाम्, पञ्चाशद्धनुरायामाम्,

---

સિંહની જેમ તમારું અતુલ પરાક્રમ જોઇ ભયથી ચપળ થતા કુતીર્થિકરૂપ મૃગો દૂર દૂર પલાયન કરો.' (૬)

એમ આશીર્વાદપૂર્વક તથ્ય વાણીથી પ્રભુની સ્તુતિ કરી અને નાટ્યવિધિ પ્રવર્ત્તાવી સુરેંદ્રો વિરામ પામતાં ભાવી ભગવંતના વિરહાગ્નિવડે દુઃખી થયેલ નંદિવર્ધન રાજા પોતાના પુરુષોને બોલાવીને કહેવા લાગ્યો કે- (૭/૮)

'અરે દેવાનુપ્રિયો! ભુવનગુરુના નિમિત્તે વિશિષ્ટ વેદિકા યુક્ત, સરસ ચંદનમિશ્રિત કેસરથી જેમાં વિવિધ સ્વસ્તિકો આળેખેલ છે, સ્થિર પાદપીઠ સહિત અને વિવિધ મણિમય સિંહાસન યુક્ત, રણરણાટ કરતી ઘુઘરીઓના મધુર નાદથી દિશાઓને વાચાળ કરનાર, રંગ-બેરંગી વિવિધ સેંકડો ધ્વજાઓ જ્યાં શોભી રહી છે, પચાશ ધનુષ્ય

पणुवीसधणुविच्छिन्नं, छत्तीसधणुमुव्विद्धं **चंदप्पभ**नामधेयं सीयं उवट्ठवेह'त्ति। तओ ते सामिवयणं निसामिऊण पहिट्ठहियया तहत्ति सव्वं निवत्तंति।

एत्थंतरे तियसाहिवेण हरिसुल्लसंतहियएण।
पवरमणिखंडमंडियमहंतखंभावलीकलिया ।।१।।

पंचविहरयणकिरणोहविहियदिसिदिसिसुरिंदकोदंडा।
चंदप्पभाए तुल्ला कारविया नियसुरें(रे?)हिंतो ।।२।।

भुवणच्छेरयभूया सिबिगा लंबंतमोत्तिओऊला।
नवरं इमावि तं चिय पढमं सिबिगं अणुपविट्ठा ।।३।। तिहिं विसेसियं।

पञ्चविंशतिःधनुःविस्तीर्णाम्, षड्त्रिंशद्धनुःउद्विद्धाम् **चन्द्रप्रभा**नामधेयां शिबिकाम् उपस्थापय' इति। ततः ते स्वामिवचनं निःशम्य प्रहृष्टहृदयाः तथेति सर्वं निवर्तन्ते।

अत्रान्तरे त्रिदशाऽधिपेन हर्षोल्लसद्हृदयेन।
प्रवरमणिखण्डमण्डितमहास्तम्भावलीकलिता ।।१।।

पञ्चविधरत्नकिरणौघविहितदिशोदिशिसुरेन्द्रकोदण्डा।
चन्द्रप्रभायाः तुल्या कारापिता निजसुरैः ।।२।।

भुवनाऽच्छेरकभूता शिबिका लम्बमानमौक्तिकावचूला।
नवरं इमाऽपि तस्यामेव प्रथमायां शिबिकायामनुप्रविष्टा ।।३।। त्रिभिः विशेषकम् ।।

લાંબી, પંચવીશ ધનુષ્ય વિસ્તૃત અને છત્રીશ ધનુષ્ય ઉન્નત એવી **ચંદ્રપ્રભા** નામે શિબિકા તૈયારી કરી લાવો.' એટલે સ્વામીનું વચન સાંભળતાં હર્ષ પામતા સેવક પુરુષોએ બધું તે પ્રમાણે તૈયાર કર્યું.

એવામાં હર્ષથી ઉલ્લાસ પામતા અંતર યુક્ત છંદ્રે પોતાના દેવો પાસે પ્રવર મણિખંડોથી મંડિત એવા મોટા સ્તંભો યુક્ત, (૧)

પાંચ પ્રકારના રત્નોના કિરણોવડે જ્યાં ચોતરફ ઇંદ્રધનુષ્યના આકાર બની રહ્યા છે એવી ચંદ્રપ્રભા સમાન એક શિબિકા તૈયાર કરાવી (૨)

કે જેમાં મોતીઓની માળાઓ લટકી રહી છે અને જેને જોતાં ભારે આશ્ચર્ય ઉત્પન્ન થાય એવી એ શિબિકા પણ પ્રથમની શિબિકામાં મૂકવામાં આવી. (૩)

अह भयवं केसालंकारेण, वत्थालंकारेण, आभरणालंकारेण, मल्लालंकारेणालंकिओ कय**छट्ठ**तवोकम्मो उट्ठिऊण आसणाओ अणुप्पयाहिणीकुणंतो चंदप्पहं सीयमारुहित्ता पुव्वाभिमुहंमि सीहासणे निसीयइ। तओ भयवओ कुलमहरिया ण्हाया, सूइभूया, गहियपवरनेवत्था, हंसलक्खणं साडयं आदाय सामिस्स दाहिणे पासे भद्दासणंमि निसन्ना। एवं अम्मधाईवि वामपासे संठिया। तहा सामिस्स पिट्ठओ एगा वरतरुणी विचित्तसिंगारागारभूयं महंतं विमलमुत्ताजाललंबंतावचूलयं पुंडरीयदंडं छत्तं धरेमाणी ठिया। उभयपासेसु य दुवे वरविलासिणीओ धोय-रुप्पपट्टधवलं चामरजुयलं गहाय संठियाओ। उत्तरपुरत्थिमंमि य भागे एगा अच्चंतदरिसणिज्जा विलया निम्मलसलिलपडिपुन्नं, सुरकरिकररेहंतनालागारं रययभिंगारमुव्वहंती निसन्ना। एवं दाहिणपुरत्थिमेणं एगा वरसुंदरी विचित्तमणिकिरणजालं मुयंतं, कणयदंडं तालवंटं करयलेण कलयंती दूरूढा। पिट्ठओ य भुवणनाहस्स भगवओ

अथ भगवान् केशाऽलङ्कारेण, वस्त्राऽलङ्कारेण, आभरणाऽलङ्कारेण, माल्याऽलङ्कारेण अलङ्कृतः *कृत**षष्ठ**तपोकर्मा उत्थाय आसनाद् अनुप्रदक्षिणीकुर्वन् चन्द्रप्रभां शिबिकाम् आरुह्य पूर्वाभिमुखं(खे)* सिंहासने निषीदति। ततः भगवतः कुलमहत्तरा स्नाता, शुचिभूता, गृहीतप्रवरनेपथ्या, हंसलक्षणां साटिकाम् आदाय स्वामिनः दक्षिणे पार्श्वे भद्रासने निषण्णा। एवं अम्बाधात्री अपि वामपार्श्वे संस्थिता। तथा स्वामिनः पृष्ठतः एका वरतरुणी विचित्रशृंङ्गाराऽऽकारभूतं, महद्, विमलमुक्ताजाललम्बमानावचूलं, पुण्डरीकदण्डं छत्रं धारयन्ती स्थिता। उभयपार्श्वेषु च द्वे वरविलासिन्यौ धौत-रुप्यपट्टधवलं चामरयुगलं गृहीत्वा संस्थिते। उत्तरपूर्वे च भागे एका अत्यन्तदर्शनीया विलया निर्मलसलिलप्रतिपूर्णं, सुरकरिकरराजमाननालाऽऽकारं रत्नभृङ्गारमुद्वहन्ती निषण्णा। एवं दक्षिणपूर्वे एका वरसुन्दरी विचित्रमणिकिरणजालं मुञ्चत् कनकदण्डं तालवृन्तं करतलेन कलयन्ती दूरूढा। पृष्ठतः च भुवननाथस्य भगवतः देवेन्द्राः हिम-रजत-कुन्देन्दुप्रकाशानि

હવે કેશાલંકાર, વસ્ત્રાલંકાર, આભરણાલંકાર તથા પુષ્પાલંકારથી અલંકૃત થયેલ, જેમણે **છઠ્ઠ** તપ કરેલ છે એવા ભગવંત આસનથકી ઉઠી, ચંદ્રપ્રભા શિબિકાને ત્રણ પ્રદક્ષિણા કરી તેમાં પૂર્વાભિમુખ સિંહાસન પર બિરાજમાન થયા. એટલે એક કુલવૃદ્ધા સ્નાનથી પવિત્ર થઇ પ્રવર નેપથ્યવસ્ત્ર લઇ, હંસલક્ષણ યુક્ત પટ-વસ્ત્ર ધરી સ્વામીની જમણી બાજુ ભદ્રાસન પર બેઠી, એમ અંબધાત્રી પણ ડાબી બાજુ બેઠી, તેમજ એક શ્રેષ્ઠસ્ત્રી વિચિત્ર શૃંગારયુક્ત, વિમલ મોતીઓના લટકતા અવચૂલ=કિનારી સહિત, કનકદંડયુક્ત એવું છત્ર ધારણ કરતી તે પ્રભુની પાછળ બેઠી, વળી બંને બાજુ બે તરૂણીઓ, ધોયેલા રૂપા સમાન ધવલ બે ચામર લઇને બેઠી, ઇશાન ખૂણે એક અત્યંત રમણીય રમણી નિર્મળ જળપૂર્ણ, ઐરાવણની સૂંઢ સમાન નાળવડે શોભાયમાન એવો રત્નનો કળશ લઇને બેઠી, અગ્નિખૂણે એક વરવનિતા વિચિત્ર મણિ-કિરણ વિસ્તારતા કનકના દંડવાળા પંખાને કરતલમાં ધારણ કરતી બેઠી, ભગવંતની પાછળ દેવેંદ્રો હિમ, રજત, કુંદ કે ઇંદુના સમાન ઉજ્વળ, વૈડૂર્યરત્નના દંડયુક્ત, એક હજાર ને આઠ સુવર્ણની શલાકા-સળી સહિત, સર્વરત્નમય, પુષ્પમાળાઓવડે અધિક ભાસમાન એવાં છત્રો ધારણ કરવા

देविंदा हिम-रयय-कुंदेंदुप्पगासाइं वेरुलियमयदंडाइं अट्ठसहस्सकंचणसलागाइं सव्वरयणामयाइं कुसुमदामदंतुराइं आयवत्ताइं धरिंति। उभयपासेसु चंदप्पहसीयाइ सोहम्माहिवो ईसाणो य अमयहिमफेणुपुंजसन्निगासेहिं चामरेहिं भयवंतं वीयंति।

एत्थंतरे नंदिवद्धणनरवइणो वयणेण पवररूवा, निरुवहयंगा, ण्हाया, कयविलेवणा, परिहियपवरवत्था, सव्वालंकारमणहरसरीरा, विसिट्ठबलसालिणो, समवया पुरिसा समूससियरोमंचकंचुया, कयसव्वकायव्वा, नीसेसपुन्नपगरिसमप्पाणं मन्नमाणा सहस्ससंखा झडत्ति आगंतूण तं सीयमुक्खिवंति। अह वच्चंतीए तीए सोहम्माहिवई सुराहिवो दाहिणिल्लमुवरिल्लबाहं गिण्हइ, ईसाणोऽवि देविंदो उत्तरिल्लबाहं, चमर-बलिणो य असुरिंदा दाहिणुत्तरसिबिगाहेट्ठिल्लबाहाओ समुव्वहंति, अवसेसा भवणवइ-वाणमंतर-जोइस-वेमाणिया य जहारिहं सीयमुक्खिवंति। किं बहुणा?-

---

वैडूर्यमयदण्डानि अष्टसहस्रकञ्चनशलाकानि सर्वरत्नमयानि कुसुमदामदन्तुराणि आतपत्राणि धारयन्ति। उभयपार्श्वयोः चन्द्रप्रभाशिबिकायाः सौधर्माधिपः ईशानश्च अमृत-हिम-फेनपुञ्जसन्निकर्षैः चामरैः भगवन्तं वीजयतः।

अत्रान्तरे नन्दिवर्धननरपतेः वचनेन प्रवररूपाः, निरूपहतरूपाः, स्नाताः, कृतविलेपनाः, परिहितप्रवरवस्त्राः, सर्वाऽलङ्कारमनोहरशरीराः, विशिष्टबलशालिनः समवयाः पुरुषाः समुच्छ्रितरोमाञ्चकञ्चुकाः, कृतसर्वकर्तव्याः, निःशेषपुण्यप्रकर्षमात्मानं मन्यमानाः सहस्रसङ्ख्यकाः झटिति आगत्य तां शिबिकाम् उत्क्षिपन्ति। अथ व्रजत्याः तस्याः सौधर्माधिपतिः सुराधिपः दक्षिणीयोपरिबाहुम् गृह्णाति, ईशानोऽपि देवेन्द्रः उत्तरीयबाहुम्, चमर-बलिनौ च असुरेन्द्रौ दक्षिणोत्तरशिबिकाअधोवर्तीबाहू समुद्वहतः, अवशेषाः भवनपति-वानव्यन्तर-ज्योतिष्क-वैमानिकाः च यथार्हं शिबिकाम् उत्क्षिपन्ति। किं बहुना? -

---

લાગ્યા, તથા બંને બાજુ સૌધર્માધિપતિ તથા ઇશાનેંદ્ર, અમૃત, હિમ, ફીણના પુંજ સમાન ચામરો ભગવંતને ઢાળવા લાગ્યા.

આ વખતે નંદિવર્ધન રાજાના વચનથી અત્યંત રૂપશાળી, આરોગ્યયુક્ત, સ્નાનપૂર્વક જેમણે વિલેપન કરેલ છે, પ્રવર વસ્ત્રો અને સર્વ અલંકારોથી શોભાયમાન, વિશિષ્ઠ બળશાળી, સમાન વયના, રોમાંચયુક્ત, સર્વ કર્ત્તવ્ય બજાવી આવેલા, પોતાના આત્માને અત્યંત ભાગ્યશાળી માનતા એવા એક હજાર પુરુષોએ આવીને તરતજ શિબિકા ઉપાડી. એમ શિબિકા ચાલતાં સૌધર્મેંદ્રે દક્ષિણ ભાગની ઉપરની શાખા લીધી, ઇશાનેંદ્રે ઉત્તર ભાગની શાખા તેમજ ચમરેંદ્રે અને બલીંદ્રે શિબિકાની નીચેની દક્ષિણ, ઉત્તરની શાખાઓ ઉપાડી, વળી બાકીના ભવનપતિ, વાણવ્યંતર, જ્યોતિષી અને વૈમાનિક ઇંદ્રોએ યથાયોગ્ય શાખા લઇ શિબિકાને ઉપાડી. વધારે તો શું?

पुव्विं उक्खित्ता माणुसेहिं साहट्ठरोमकूवेहिं।
पच्छा वहंति सीयं असुरिंद-सुरिंद-नागिंदा ।।१।।

गेहाओ नीहरंते जिणंमि चाउव्विहेहिं देवेहिं।
इंतेहि य जंतेहि य कहमिव उब्भासियं गयणं? ।।२।।

वणसंडोव्व कुसुमिओ पउमसरो वा जहा सरयकाले।
सोहइ कुसुमभरेणं इय गयणयलं सुरगणेहिं ।।३।।

सिद्धत्थवणं व जहा असणवणं सणवणं असोगवणं।
चूयवणं व कुसुमियं इय गयणयलं सुरगणेहिं ।।४।।

पूर्वे उत्क्षिप्ता मनुष्यैः सहर्षरोमकूपैः।
पश्चाद् वहन्ति शिबिकाम् असुरेन्द्र-सुरेन्द्र-नागेन्द्राः ।।१।।

गृहाद् निहरति जिने चतुर्विधैः देवैः।
आयद्भिः (=आगच्छद्भिः) च यद्भिः च कथमिव उद्भासितं गगनम् ।।२।।

वनखण्डः इव कुसुमितः, पद्मसरः वा यथा शरदकाले।
शोभते कुसुमभरेण इव गगनतलं सुरगणैः ।।३।।

सिद्धार्थवनं वा यथा असनवनम्, शणवनम्, अशोकवनम्।
चू..वनम् वा कुसुमितमिति गगनतलं सुरगणैः ।।४।।

પ્રથમ ભારે હર્ષથી ઉલ્લાસ પામતા મનુષ્યોએ અને પછી અસુરેંદ્ર, સુરેંદ્ર અને નાગેંદ્રોએ તે શિબિકા ઉપાડી. (૧)

એમ પ્રભુ ઘરથી નીકળતાં ચાર પ્રકારના જતા-આવતા દેવોવડે આકાશ અદ્‌ભુત રીતે પ્રકાશવા લાગ્યું. (૨)

શરદકાળમાં કુસુમિત થયેલ વનખંડ અથવા કુસુમ-સમૂહથી પદ્મસરોવરની જેમ દેવતાઓવડે ગગનતલ શોભવા લાગ્યું. (૩)

સિદ્ધાર્થવન, અસનવન, સણવન, અશોકવન અને આમ્રવન જેમ કુસુમિત થયેલ શોભે, અલસીવન, કણેરવન, ચંપકવન, તિલકવન જેમ પુષ્પોથી શોભે તેમ આ વખતે ગગનતલ દેવોવડે શોભવા લાગ્યું. (૪/૫)

अयसिवणं व कुसुमियं कणियारवणं व चंपगवणं वा।
तिलयवणं व कुसुमियं इय गयणयलं सुरगणेहिं ।।५।।

वरपडह-भेरि-झल्लरि-दुंदुभि-संखाइतूरनिग्घोसो।
धरणियले गयणयले पयट्टिओ देवमणुएहिं ।।६।।

एवं च भुवणबंधवस्स वच्चमाणस्स तप्पढमयाए सव्वरयणविणिम्मविया पुरओ अहाणुपुव्वीए सोत्थियाइणो **अट्ठमंगल**गा संपट्ठिया। तयणंतरं च पुन्नकलसभिंगारा, दिव्वा सच्छत्तपडागा, गयणतलचुंबिणीओ पवणकंपमाणंचलाओ महावेजयंतियाओ संपट्ठियाओ। तयणंतरं वेरुलियविमलदिप्पंतदंडं पलंबकोरिंटमालोवसोहियं चंदमंडलाणुरूवं समूसियं दिव्व**मायवत्तं,** पवर**सिंहासणं** च समणि-रयणपायवीढं, मणिमयपाउयाजोगसंपजुत्तं, बहुकिंकरनरपरिग्गहियं संपट्ठियं। तयणंतरं च ललियपुलियलंघणजवणगईणं, लोलंतलासग-ललामंबरभूसणाणं,

---

अतसीवनं वा कुसुमितं कर्णिकारवनं वा चम्पकवनं वा।
तिलकवनं वा कुसुमितमिति गगनतलं सुरगणैः ।।५।।

वरपटह-भेरी-झल्लरी-दुन्दुभि-शङ्खादितूरनिर्घोषः।
पृथिवीतले गगनतले प्रवर्तितः देव-मनुजैः ।।६।।

एवं च भुवनबान्धवस्य व्रजतः तत्प्रथमतया सर्वरत्नविनिर्मापितानि पुरतः यथानुपूर्व्या स्वस्तिकादीनि **अष्टमङ्गलानि** सम्प्रस्थितानि। तदनन्तरं च पूर्ण**कलशभृङ्गाराः**, दिव्याः **सछत्रपताकाः**, गगनतलचुम्बिन्यः पवनकम्पमानाञ्चलाः **महावैजयन्त्यः** सम्प्रस्थिताः। तदनन्तरं वैडूर्यविमलदीप्यमानदण्डं प्रलम्बमानकोरण्ट-मालोपशोभितं चन्द्रमण्डलाऽनुरूपं समुच्छ्रितं दिव्यम् **आतपत्रम्,** प्रवर**सिंहासनं** च समणि-रत्नपादपीठं, मणिमयपादुकायोगसम्प्रयुक्तं, बहुकिङ्करनरपरिगृहीतं सम्प्रस्थितम्। तदनन्तरं च ललितपुलिनलङ्घन-

---

વળી ધરણીતલ તથા આકાશતલમાં મનુષ્યો અને દેવતાઓએ વગાડેલ પટહ, પ્રવર ભેરી, ઝાલર, દુંદુભિ અને શંખાદિક વાદ્યોનો નિર્ઘોષ સતત પ્રવર્ત્તી રહ્યો. (૬)

એમ જગદ્‌ગુરુના જતાં પ્રથમ સર્વ રત્નોવડે રચેલાં અનુક્રમે સ્વસ્તિકાદિ અષ્ટમંગળ ચાલ્યાં; તે પછી પૂર્ણકળશો, દિવ્ય છત્ર, પતાકાઓ, બહુ ઊંચી અને પવનથી ઉછળતી મોટી ધ્વજાઓ ચાલી; ત્યારબાદ વજ્રરત્નથી બનાવેલ વિમલ દંડયુક્ત, લટકતી કોરંટ-પુષ્પોની માળાઓથી સુશોભિત તથા ચંદ્રમંડળ સમાન એવું દિવ્ય અને ઉન્નત છત્ર ચાલ્યું; મણિરત્નના પાદપીઠ તથા મણિમય પાદુકા યુક્ત અને ઘણા કિંકરોએ ઉપાડેલ એવું પ્રવર સિંહાસન ચાલ્યું; પછી લલિત, જાણે નદીના કિનારાને ઉલ્લંઘતી ગતિવડે ભારે વેગશાળી, લલિત હેષારવ, શ્રેષ્ઠ

कणयमयमुहनिजोगजुत्ताणं, उज्जलगथासगमंडियकडीणं, तरुणपुरिस-परिक्खित्ताणं अट्ठसयं **जच्चतुरगा**णं अहाणुपुव्वीए संपट्ठियं। तयणंतरं च सत्तंगपइट्ठियाणं, भद्दजाइसमुब्भवाणं, सव्वलक्खणोववेयाणं, कंचणकोसीपविट्ठकलहोयधवलदंताणं, कंचणमणितारगाभूसियाणं, कुसलारोहसंपउत्ताणं अट्ठसयं उत्तम**कुंजरा**णं संपट्ठियं। तयणंतरं च सछत्ताणं, सज्झयाणं, सघंटाणं, सपडागाणं, सतोरणवराणं, सनंदिघोसाणं, हिमवंतुग्गयतिणिसदारुनिम्मियाणं, सुसिलिट्ठचक्कमंडलधुराणं, जोत्तियपवरतुरंगाणं, रणज्झणंतकिंकिणी-जालाणं, बत्तीसतोणपरिमंडियाणं, चावपमुहपहरणनिवहभरियाणं अट्ठसयं **रहा**णं अहाणुपुव्विए संपट्ठियं। तयणंतरं निबिडपरियराणं, करयलकलियविविहाउहाणं, नियय्विक्कमोवह-सियसेस**भडा**णं पुरिसाणमट्ठसयं संपट्ठियं। तयणंतरं च अपरिगणियसंखं **हयाणीयं, गयाणीयं, रहाणीयं,**

जवगतिकानाम्, लोलद्लासक-प्रधानाम्बरभूषणवताम्, कनकमयमुखनियोगयुक्तानाम्, उज्ज्वल स्थासकमण्डितककटीनाम्, तरुणपुरुषपरिक्षिप्तानाम् अष्टशतं **जात्यतुरगा**नां यथानुपूर्व्या सम्प्रस्थितम्। तदनन्तरं च सप्ताङ्गप्रतिष्ठितानाम्, भद्रजातिसमुद्भवानाम्, सर्वलक्षणोपपेतानाम्, कञ्चनकोशीप्रविष्टकल-धौतधवलदन्तानाम्, कञ्चनमणितारकभूषितानाम्, कुशलारोहसम्प्रयुक्तानाम् अष्टशतम् उत्तम**कुञ्जराणां** सम्प्रस्थितम्। तदनन्तरं च सछत्राणाम्, सध्वजानाम्, सघण्टानाम्, सपताकानाम्, सतोरणवराणाम्, सनन्दिघोषाणाम् हिमवन्तोद्गततिनिशदारुनिर्मितानाम्, सुश्लिष्टचक्रमण्डलधूराणाम्, योक्त्रितप्रवरतुरगाणाम्, रणरणायमानकिङ्किणीजालानाम्, द्वात्रिंशत्तूणीरपरिमण्डितानाम्, चापप्रमुखप्रहरणनिवहभृतानाम् अष्टशतं **रथा**नां यथानुपूर्व्या सम्प्रस्थितम्। तदनन्तरं निबिडपरिकराणाम्, करतलकलितविविधाऽऽयुधानाम्, निजविक्रमोपहसितशेष**भटा**नां पुरुषाणाम् अष्टशतं सम्प्रस्थितम्। तदनन्तरं च अपरिगणितसङ्ख्यं **हयाऽनी**कम्,

વસ્ત્ર તથા ભૂષણોવડે વિભૂષિત, કનકની લગામથી શોભાયમાન, જેમનો કટિભાગ ઉજ્વળ દર્પણથી શોભે છે, જેમના પર તરુણ પુરુષો આરૂઢ થયા છે એવા એક સો આઠ જાત્ય અશ્વો અનુક્રમે ચાલ્યા; તે પછી સપ્તાંગવડે પ્રતિષ્ઠિત, ભદ્રજાતિના, સર્વ શુભ લક્ષણો સહિત, કંચનની કોરથી મઢેલ જેમના ચાંદી જેવા ધવલ દાંત છે, કંચન અને મણિના તારલાથી વિભૂષિત, કુશળ મહાવત જેમના પર આરૂઢ થયેલ છે એવા એક સો આઠ ઉત્તમ હાથીઓ ચાલ્યા; ત્યારબાદ સછત્ર, સધ્વજ, ઘંટાયુક્ત, પતાકા તથા પ્રવર તોરણ સહિત, બાર પ્રકારનાં વાદ્યોના ઘોષ યુક્ત, હિમાલયમાં ઉત્પન્ન થયેલ તિનિશ-વૃક્ષના કાષ્ટથી બનાવેલ, મજબૂત ચક્ર અને ધુરા-ધોંસરી સહિત, પ્રવર અશ્વો જેમાં જોતરેલા છે, જેમાં ઘુઘરીઓ રણઝણાટ કરી રહી છે, બત્રીસ તૂણીર=ભાથા જેમાં રાખવામાં આવેલ છે, ધનુષ્ય પ્રમુખ આયુધોથી ભરેલા એવા એક સો આઠ રથો ચાલ્યા; પછી સજ્જ થયેલા અને કરતલમાં વિવિધ આયુધોને ધારણ કરતા, પોતાના પરાક્રમથી અન્ય સુભટોને હસી કહાડનાર એવા એક સો આઠ સુભટ પુરુષો ચાલ્યા; તે પછી જેની સંખ્યા ન થઇ શકે એવા અસવારો, ગજસૈન્ય, રથસેના અને પાયદળો ચાલ્યા; પછી પાંચ વર્ણની હજારો નાની પતાકાયુક્ત, વજ્રમય ગોળ સુંદર દંડ પર પ્રતિષ્ઠિત, વિવિધ ત્રણ છત્રો યુક્ત, જેમાં ભમરા

पायत्ताणीयं च पहावियं। तयणंतरं च पंचवन्नकुडभीसहस्सकलिओ, वइरमयवट्ट-लट्ठजट्ठिपइट्ठिओ, विचित्तछत्ताइच्छत्तपरिक्खित्तो, रंटंतभमरकुसुममालामंडिओ, अनिलंदोलिज्ज-माणघंटियापडलमणहरारावपूरियनहविवरो, जसपुंजोव्व मुत्तिमंतो, मुत्तिमग्गोव्व पयडो, नियगुरुयत्तणेण गयणं व परिमिणंतो, सायरसुरविसरसंपरिग्गहिओ, जोयणसहस्सूसिओ **महिंद**ज्झओ संपत्थिओ। तयणंतरं च अन्ने य बहवे **दंडिणो,** मुंडिणो, सिहंडिणो, **हासकरा,** खेड्डुकरा, चाडुकरा, गायंता य, वायंता य, नच्चंता य, रमंता य, हसंता य, जयजयसद्दं पउंजमाणा, मंगलसहस्साइं कुणमाणा, गुणगणं थुणमाणा संपत्थिया। तयणंतरं उग्गा, भोगा, रायन्ना, खत्तिया, सेट्ठिणो, सत्थवाहा पुरिसनियरपरियरिया केइ पायविहारेणं, केइ रहगया, केइ तुरगाधिरूढा, केइ कुंजरपट्ठिसन्निसन्ना केइ जाण-जंपाणाइगया सामिस्स पुरओ मग्गओ य संपट्ठिया। तयणंतरं अन्ने य बहवे देवा य देवीओ य सएहिं सएहिं विमाणेहिं, सएहिं सएहिं

गजाऽनीकम्, रथाऽनीकम् पदात्यनीकञ्च प्रधावितम्। तदनन्तरञ्च पञ्चवर्णकुटभिसहस्रकलितः, वज्रमयवृत्त-मनोहर-यष्टिप्रतिष्ठितः, विचित्रछत्रातिछत्रपरिक्षिप्तः, रटद्भ्रमरकुसुममालामण्डितः, अनिलाऽऽन्दोल्यमानघण्टिकापटलमनोहराऽऽरावपूरितनभोविवरः, यशःपुञ्जः इव मूर्तिमान्, मुक्तिमार्गः इव प्रकटः, निजगुरुतया गगनमिव परिमिन्वन्, सादरसुरविसरसम्परिगृहीतः, योजनसहस्रोच्छ्रितः **महेन्द्रध्वजः** सम्प्रस्थितः। तदनन्तरं च अन्ये बहवः **दण्डिनः**, मुण्डिनः, शिखण्डिनः, **हास्यकराः**, खेलकराः, चाटुकराः गायन्तश्च, वादयन्तश्च, नृत्यन्तश्च, रममाणाश्च, हसन्तश्च, जय-जयशब्दं प्रयुञ्जन्तः, मङ्गलसहस्राणि कुर्वन्तः, गुणगणं स्तुवन्तः सम्प्रस्थिताः। तदनन्तरम् उग्राः, भोगाः, **राजन्याः** क्षत्रियाः, श्रेष्ठिनः, सार्थवाहाः पुरुषनिकरपरिवृत्ताः केऽपि पादविहारेण, केऽपि रथगताः, केऽपि तुरगाऽधिरूढाः, केऽपि, कुञ्जरपृष्ठसन्निषण्णाः, केऽपि यानजम्पानाऽतिगताः स्वामिनः पुरत मार्गतः च सम्प्रस्थिताः। तदनन्तरम् अन्ये च बहवः **देवाश्च** देव्यश्च स्वकैः स्वकैः विमानैः, स्वकैः स्वकैः चिह्नैः, स्वकैः स्वकैः परिवारैः समन्ततः सम्प्रस्थिताः।

ગણગણાટ કરી રહ્યા છે એવી પુષ્પમાળાઓ વડે શોભતો, પવનથી દોલાયમાન થતી ઘંટડીઓના મનહર અવાજથી નભોભાગને પૂરનાર, જાણે સાક્ષાત્ યશઃપુંજ હોય અથવા જાણે પ્રગટ મુક્તિમાર્ગ હોય, પોતાની મોટાઇથી જાણે આકાશને પામતો હોય, સાદર દેવોના સમૂહથી પરિગૃહીત અને એક હજાર યોજન ઉંચો એવો **મહેંદ્રધ્વજ** ચાલ્યો; તે પછી બીજા ઘણા દંડી, મુંડકો, જટાધારી, વિદુષકો, ખેલાડી, મશ્કરા ગાતા, વગાડતા, નાચતા, રમતા-હસતા, જયજય શબ્દ બોલતા, મંગલ ઉચ્ચારતા અને ગુણગણને સ્તવતા ચાલ્યા; ત્યારબાદ ઉગ્રભોગી ક્ષત્રિયો, રાજવંશીઓ, શ્રેષ્ઠીઓ, સાર્થવાહો પોતાના પરિવાર સહિત, કેટલાક પગે, કેટલાક રથારૂઢ થઇ, કેટલાક અશ્વપર બેસી, કેટલાક હાથીપર, કેટલાક પાલખીમાં બેસી સ્વામીની આગળ આગળ ચાલ્યા; તે પછી અન્ય ઘણા દેવો, દેવીઓ, વિમાને પોતપોતાના ધ્વજ સહિત અને પોતપોતાના પરિવાર સહિત ચોતરફ ચાલવા લાગ્યા. આ પ્રસંગે નંદિવર્ધન રાજા

चिंधेहिं, सएहिं सएहिं परिवारेहिं समंतओ संपट्ठिया। नंदिवद्धणमहानरिंदोऽवि कयमज्जणो, विहियसिंगारो, गंधसिंधुरखंधगओ, समूसियसियायवत्तो, धुव्वंतधवलचामरो, हय-गय-रहओहसेणापरिकिन्नो पिट्ठओ भयवंतं अणुगंतुमारद्धो।

एवं च नियनियट्ठाणगयसुरासुरनरनियराणुगम्ममाणो **वद्धमाणो** सत्तरयणिप्प-माणसरीरो, समचउरंससंठाणसंठिओ, वज्जरिसहनारायसंघयणो, कमलुप्पलसुरहिनीसासो, जल्ल-मलकलंक-सेय-रयदोसवज्जियतणू, देहप्पभापब्भारभासुरियदिसिचक्कवालो, भिंग-नीलकज्जल-भसलसामलपसत्थसुहुमनिबद्धनिउरंबनिचियकुंचियपयाहिणावत्तकेसो, अद्धयंदसमनिडालवट्टो, पमाणजुत्तसुंदरसवणो, चावदंडकुडिलभमुहो, धवल-पत्तल-वियसियपुंडरियनयणो, गरुडाययउज्जुतुंगनासो, विपक्कबिंबाफलसंनिभाधरोट्ठो, संखगोखीर-मुत्तामणिधवलसुसिलिट्ठसमदंतपंती, पीणमंसलकवोलजुयलो, सजलघणत्थणियदुंदुभि-

---

नन्दिवर्धनमहानरेन्द्रः अपि कृतमज्जनः, विहितशृङ्गारः गन्धसिन्धुरस्कन्धगतः, समुच्छ्रितश्वेताऽऽतपत्रः, धूयमानधवलचामरः, हय-गज-रथौघसेनापरिकीर्णः प्रस्थितः भगवन्तमनुगन्तुम् आरब्धः।

एवं च निजनिजस्थानगतसुरासुरणरणिकराऽणुगम्यमानः **वर्धमानः** सप्तरत्नीप्रमाणशरीरः, समचतुरस्रसंस्थानसंस्थितः, वज्रऋषभनाराचसङ्घयणः, कमलोत्पलसुरभिनिःश्वासः, जल्ल(देहमल)-मल(कर्ममल)कलङ्क-स्वेद-रजदोषवर्जिततनुः, देहप्रभाप्राग्भारभासुरितदिक्चक्रवालः, भृङ्ग-नीलकज्जल-भसलश्यामलप्रशस्तसूक्ष्मनिबद्धनिकुरम्बनिचितकुञ्चितप्रदक्षिणाऽऽवर्तकेशः, अर्धचन्द्रसमललाटपृष्ठः, प्रमाणयुक्तसुन्दरश्रवणः, चापदण्डकुटिलभ्रूकः, धवल-पत्रल-विकसितपुण्डरीकनयनः, गरुडाऽऽयतर्जुतुङ्गनासः, विपक्वबिम्बफलसन्निभाऽधरौष्ठः, शङ्ख-गोक्षीर-मुक्तामणिधवलसुश्लिष्टसमदन्तपङ्क्तिः, पीन-

---

સ્નાન-મજ્જનાદિ કરી, શૃંગાર પહેરી, ગંધહસ્તી પર આરૂઢ થઈ, આતપત્ર તથા ધવલ ચામરોથી શોભાયમાન, કુંજર, અશ્વ, રથ, યોદ્ધાની સેના સહિત તે ભગવંતની પાછળ પાછળ જવા લાગ્યો.

એ રીતે પોતપોતાના યોગ્ય સ્થાને રહેલા સુર, અસુર અને પુરુષ-સમૂહથી અનુસરાતા, સાત હાથપ્રમાણ શરીરવાળા, સમચતુરસ્રસંસ્થાન યુક્ત, વજ્રઋષભનારાચસંઘયણ સહિત, કમળ સમાન સુગંધી શ્વાસ યુક્ત, મલિન પ્રસ્વેદ, મળ, કલંક, રજ, મેલ પ્રમુખ દોષથી વર્જિત, દેહપ્રભાવડે દિશાઓને પ્રકાશિત કરનાર, ભ્રમર, નીલ કાજળ પ્રમુખ સમાન શ્યામ, પ્રશસ્ત, સ્નિગ્ધ એવો કેશસમૂહ જેમણે નિબિડ રીતે પ્રદક્ષિણા આવર્તથી બાંધી લીધેલ છે, લલાટભાગ જેમનો અર્ધચંદ્ર સમાન શોભાયમાન છે, સુંદર શ્રવણ જેમના પ્રમાણ યુક્ત છે, જેમની ભ્રકુટી ધનુર્દંડ સમાન વક્ર છે, ધવલપત્ર યુક્ત વિકાસ પામેલા પુંડરિક તુલ્ય જેમનાં લોચન છે, ગરૂડ સમાન જેમની નાસિકા સરળ, ઉન્નત અને લાંબી છે, જેમનો અધરોષ્ઠ પાકેલા બિંબફળ સમાન અને દંતપંક્તિ શંખ, ગોક્ષીર, મોતી સમાન ધવલ સુશ્લિષ્ટ-સુ-સંબંદ્ધ અને સરખી છે, જેમના કપોલ પુષ્ટ અને માંસથી ભરેલા છે, પાણી ભરેલા

निग्घोसगंभीरसरो, दाहिणावत्तरेहावलयालंकियसुप्पमाणकंठकंदलो, वणमहिस-सीह-सद्दूलपडि-पुन्नवट्टखंधो, सुहुमलोमरेहंतमंसलपलंबबाहुदंडो, संजमलच्छिनिवाससुभग-विसालवच्छत्थलो, पवररोमराइरेहिरगंभीरनाहिसोहियमज्झभागो, वट्टाणुपुव्वोवचियचारुजंघो, सुसिलिट्ठगूढगुंफो नग-नगर-मगर-सागर-चक्कंकुस-मच्छाइलक्खणलंछियचलणतलो परिचत्तपाणभोयणेसु पासायसिहरमारूढेसु चेलुक्खेवं करेंतेसु पुरजणेसु, कुसुमनियरं मुंचमाणेसु गयणट्ठियतियसेसु, सप्पणयपणच्चमाणासु विज्जाहरीसु, मंगलमुहलेसु वारविलयासत्थेसु, दिज्जमाणेसु सव्वकामुयदाणेसु, गोत्तमुक्कित्तमाणेसु देवचारणेसु कमेण संपत्तो **नायसंडा**भिहाणं(ण?)मुववणंमि। तं च केरिसं?-

पढमुम्मिल्लिरपल्लवसोहिल्लमहल्लपायवसमूहं।
सव्वोउयकुसुमसमिद्धगंधवायंतमिउपवणं ।।१।।

मांसलकपोलयुगलः, सजलघनस्तनितदुन्दुभिनिर्घोषगम्भीरस्वरः, दक्षिणावर्तरेखावलयाऽलङ्कृत-सुप्रमाणकण्ठकन्दलः, वनमहिष-सिंह-शार्दूलप्रतिपूर्णाऽऽवर्तस्कन्धः, सूक्ष्मरोमराजमानमांसलप्रलम्बबाहुदण्डः, संयमलक्ष्मीनिवाससुभगविशालवक्षस्थलः, प्रवररोमराजीराजमानगम्भीरनाभिशोभितमध्यभागः, वृत्तानुपूर्वोपचित-चारुजङ्घः, सुश्लिष्टगूढगुल्फः, नग-नगर-मकर-सागर-चक्राऽङ्कुश-मत्स्यादिलक्षणलाञ्छितचरणतलः परित्यक्तपान-भोजनेषु प्रासादशिखरमारुढेषु वस्त्रक्षेपं कुर्वत्सु पुरजनेषु, कुसुमनिकरं मुञ्चत्सु गगनस्थितत्रिदशेषु, सप्रणयप्रनृत्यत्सु विद्याधरीषु, मङ्गलमुखरेषु वारविलयासार्थेषु, दीयमानेषु सर्वकामुकदानेषु, गोत्रम् उत्कीर्तयत्सु देवचारणेषु क्रमेण सम्प्राप्तः **ज्ञातखण्डा**ऽभिधानम् उपवनम्। तच्च कीदृशम्?-

प्रथमोन्मिलत्पल्लवशोभमानमहापादपसमूहम्।
सर्वर्तुककुसुमसमृद्धगन्धवान्मृदुपवनम् ।।१।।

વાદળા કે દુંદુભિના નાદ સમાન જેમનો ગંભીર સ્વર છે, દક્ષિણાવર્ત રેખાવલયથી અલંકૃત અને સુપ્રમાણ જેમનો કંઠ છે, વનમહિષ, સિંહ કે વાઘ સમાન જેમનો સ્કંધ પરિપૂર્ણ છે, સૂક્ષ્મ રોમથી શોભાયમાન જેમના બાહુદંડ માંસલ=માંસવડે પુષ્ટ છે, જેમનું વિશાલ વક્ષસ્થળ સંયમ-લક્ષ્મીના નિવાસવડે સુભગ છે, પ્રવર રોમાવલિવડે સુશોભિત અને ગંભીર નાભિવડે જેમનો મધ્યભાગ રમણીય છે, જેમની સુંદર જંઘાઓ અનુક્રમે ઉપર ઉપર પુષ્ટિયુક્ત છે, જેમની પગની ગાંઠ ગૂઢ અને સુશ્લિષ્ટ છે, પર્વત, નગર, મગર, સાગર, ચક્ર, અંકુશ, મત્સ્યાદિક લક્ષણયુક્ત જેમના ચરણતલ છે એવા શ્રી વર્ધમાનસ્વામી, ભોજન-પાન તજી પ્રાસાદના શિખરપર આરૂઢ થઇ નગરજનોએ વસ્ત્રવૃષ્ટિ કરતાં, આકાશમાં રહીને દેવોએ પુષ્પવૃષ્ટિ કરતાં, વિદ્યાધરીઓએ પ્રેમપૂર્વક નૃત્ય કરતાં, વારાંગનાઓએ મંગલશબ્દો ઉચ્ચારતાં, ઇચ્છિત દાન આપવામાં આવતાં, દેવ-ચારણોએ ગોત્રની ઉત્કૃષ્ટતા વર્ણવતાં અનુક્રમે પ્રભુ **જ્ઞાતખંડ** નામના ઉપવનમાં પધાર્યા કે જ્યાં

પ્રથમ પ્રગટ થયેલા પલ્લવોથી મોટા વૃક્ષો શોભાયમાન છે, સર્વે ઋતુઓના પુષ્પોના ગંધ યુક્ત મૃદુ પવન જ્યાં વાઇ રહ્યો છે, (૧)

तरुणतरुसंडपत्तलसाहापडिरुद्धसूरकरपसरं।
अच्चंतरम्मयागुणरंजियपरिभमियसुर-खयरं ।।२।।

दिसिमुहपवियंभियकुसुमपरिमलायड्ढिया भमरनियरा।
उज्जाणंतरविहरणपरंमुहा जत्थ कीलंति ।।३।।

जं जिणमिंतं नाऊण पवणडोल्लंतपल्लवकरेहिं।
चिरकालदिट्ठपियमाणुसं व तं वाहरइ तुरियं ।।४।।

मयभरपरवससिहिकलरवेण जं सागयं व वागरइ।
निवडंतकुसुमनियरुक्करेण अग्घंव दावेइ ।।५।।

इय नियययचंगिमाविजियनंदणुज्जाणरम्मयगुणस्स।
जयनाहचलणपूयस्स तस्स का वण्णणा होउ? ।।६।।

तरुणतरुखण्डपत्रकशाखाप्रतिरुद्धसूर्यकरप्रसरम्।
अत्यन्तरम्यतागुणरञ्जितपरिभ्रमत्सुर-खेचरम् ।।२।।

दिग्मुखप्रविजृम्भितकुसुमपरिमलाऽऽकृष्टाः भ्रमरनिकराः।
उद्यानान्तरविहरणपराङ्मुखाः यत्र क्रीडन्ति ।।३।।

यं जिनमायन्तं ज्ञात्वा पवनदोलत्पल्लवकरैः।
चिरकालदृष्टप्रियमानुषमिव तं व्याहरति त्वरितम् ।।४।।

मदभरपरवशशिखिकलरवेण यद् स्वागतमिव व्याकरोति।
निपतत्कुसुमनिकरोत्करेण अर्घ्यमिव दापयति ।।५।।

इति निजमनोहरताविजितनन्दनोद्यानरम्यतागुणस्य।
जगन्नाथचरणपूतस्य तस्य का वर्णना भवतु? ।।६।।

કોમળ વૃક્ષોની પત્ર યુક્ત શાખાઓવડે રવિકિરણો જ્યાં નિરુદ્ધ થતા ભાસે છે, અત્યંત રમણીયતાને લીધે રંજિત થયેલ દેવ-વિદ્યાધરો જ્યાં રમતા હતા, (૨)

ચોતરફ પ્રસરતા કુસુમ-પરિમલથી આકૃષ્ટ થયેલ જ્યાં મધુકરો અન્ય ઉદ્યાનમાં જવાની દરકાર ન કરતાં ભમતા હતા, (૩)

જિનેશ્વરને આવતા જાણી પવનથી ડોલતા પલ્લવરૂપ હસ્તવડે જે ચિરકાળે જોવામાં આવેલ પ્રિયજનની જેમ સત્વર જાણે બોલાવતું હોય, (૪)

મદભરથી પરવશ થયેલા મયૂરોના કલરવવડે જે સ્વાગત જાણે કરતું હોય, પડતાં અનેક પુષ્પોના ઢગલા વડે જાણે અર્ઘ્ય (=પૂજાની સામગ્રી) અપાવતું હોય (૫)

એમ પોતાની રમણીયતાથી નંદનવનની શોભાને પરાસ્ત કરનાર અને જગદીશના ચરણથી જે પાવન થયેલ છે તેનું વર્ણન કેટલું થઇ શકે? (૬)

एवंविहंमि तत्थ आगंतूण सिबियाओ ओयरिऊण सामी असोगवरपायवस्स मूले सयमेव अलंकार-कुसुमनिवहं ओमुयइ। सा य कुलमयहरिया हंसलक्खणेणं पवरसाडएणं तं पेच्छमाणी, छिन्नमुत्ताकलावगलंतमुत्ताहलविब्भमाइं, अंसुयाइं विणिम्मुयमाणी, सदुक्खं रोयमाणी मन्नुभरखलंतक्खराए गिराए भयवंतं भणिउं पवत्ता-

'कासवगोत्तुब्भूओऽसि पुत्त! सिद्धत्थपत्थिवसुओऽसि।
नायकुलनहयलामलसारयरयणीमयंकोऽसि ।।१।।

वासिट्ठसगोत्तुब्भवतिसलादेवीए कुच्छिजाओऽसि।
खत्तियजणतिलओऽसि य नवजोव्वणदिव्वदेहोऽसि ।।२।।

एवंविधे तत्र आगत्य शिबिकातः अवतीर्य स्वामी अशोकवरपादपस्य मूले स्वयमेव अलङ्कार-कुसुमनिवहम् अवमुञ्चति। सा च कुलमहत्तरा हंसलक्षणेन प्रवरसाटकेन तं प्रेक्षमाणी = गृह्णन्ती छिन्नमुक्ताकलापगलन्मुक्ताफलविभ्रमानि अश्रूणि विनिमुञ्चन्ती, सदुःखं रुदन्ती मन्युभरस्खलदक्षरया गिरा भगवन्तं भणितुं प्रवृत्ता -

'काश्यपगोत्रोद्भूतः असि पुत्र! सिद्धार्थपार्थिवसुतः असि।
ज्ञातकुलनभस्तलाऽमलशारदरजनीमृगाङ्कः असि ।।१।।

वाशिष्ठसगोत्रोद्भवत्रिशलादेव्याः कुक्षिजातः असि।
क्षत्रियजनतिलकः असि च नवयौवनदिव्यदेहः असि ।।२।।

એ ઉદ્યાનમાં આવી શિબિકાપરથી નીચે ઉતરી, અશોક વૃક્ષની નીચે પ્રભુએ પોતે જ અલંકાર-પુષ્પાદિક ઉતારી મૂક્યાં. એટલે પેલી કુલવૃદ્ધા, હંસલક્ષણ રેશમી વસ્ત્રમાં તોડી નાખેલ મોતીના ઝુમખામાંથી નીકળતા મોતી સમાન તે જોતી (= લેતી) આંસુઓ મૂકતી તથા દુઃખપૂર્વક રુદન કરતી તે શોકવડે સ્ખલિત થતી વાણીથી ભગવંતને કહેવા લાગી કે-

'હે પુત્ર! તું કાશ્યપ ગોત્રમાં જન્મ્યો છે, સિદ્ધાર્થ રાજાનો પુત્ર છે અને જ્ઞાતકુલરૂપ આકાશમાં શરદપૂનમના ચંદ્ર સમાન છે, (૧)

વાશિષ્ઠ ગોત્રમાં ઉત્પન્ન થયેલ ત્રિશલાદેવીના ઉદરથી ઉત્પન્ન થયેલ છે, ક્ષત્રિયોમાં તિલક સમાન અને નવયૌવનવડે દિવ્ય દેહધારી છે, (૨)

गब्भावत्थाओच्चिय अइसुकुमालोऽसि, सुंदरंगोऽसि।
अप्पडिमरूवलायन्नकंतिपब्भारकलिओऽसि ।।३।।

तिहुयणविक्खायजसोऽसि, सयलविन्नाण-नीइनिउणोऽसि।
ता कहमिममइदुक्करतवकम्मं संपवज्जिहिसि? ।।४।।

इह असिधारसरिच्छं महव्वयं वच्छ! अणुचरेयव्वं।
घोरोवसग्गवेयणनिवहाओ न भाइयव्वं च ।।५।।

सुद्धुंछ-तुच्छभोयणवित्ती निच्चंपि एत्थ कायव्वा।
गामागराइसु तहा पडिबंधमई विमोत्तव्वा ।।६।।

इय वच्छ! तुज्झ साहेमि केत्तियं मुणियसयलभावस्स।
तह कहवि पयट्टेज्जसु जह सिवसोक्खं लहुं लहसि' ।।७।।

गर्भावस्थातः एव अतिसुकुमालः असि, सुन्दराङ्गः असि।
अप्रतिमरूप-लावण्य-कान्तिप्राग्भारकलितः असि ।।३।।

त्रिभुवनविख्यातयशाः असि, सकलविज्ञाननीतिनिपुणः असि।
तस्मात् कथमिदम् अतिदुष्करतपोकर्म सम्प्रव्रजिष्यसि? ।।४।।

इह असिधारासदृशं महाव्रतं वत्स! अनुचरितव्यम्।
घोरोपसर्गवेदनानिवहेभ्यः न भेतव्यं च ।।५।।

शुद्धोञ्छ-तुच्छभोजनवृत्तिः नित्यमपि अत्र कर्तव्या।
ग्रामाकरादिषु तथा प्रतिबन्धमतिः विमोक्तव्या ।।६।।

इति वत्स! तव कथयामि कियन्मात्रं ज्ञातसकलभावस्य!।
तथाकथमपि प्रवर्तस्व यथा शिवसौख्यं लघुः लभसे' ।।७।।

ગર્ભાવસ્થાથી જ અતિસુકુમાલ તથા સુંદર અંગયુક્ત છે, અપ્રતિમ રૂપ, લાવણ્ય અને કાંતિવડે અદ્‌ભુત છે, (૩)

ત્રિભુવનમાં વિખ્યાત અને સમસ્ત વિજ્ઞાન તથા નીતિમાં નિપુણ છે, તો આવું અતિદુષ્કર તપ-અનુષ્ઠાન શી રીતે પાળી શકીશ? (૪)

હે વત્સ! અસિધારા સમાન એ મહાવ્રતનું બરાબર પાલન કરજે, ઘોર ઉપસર્ગની વેદનાથકી જરા પણ બીવું નહિ, (૫)

એ સંયમમાં શુદ્ધ અને તુચ્છ ભિક્ષાવૃતિ સદા કરવાની છે, તથા ગામ કે નગરાદિકમાં રાગની બુદ્ધિ છોડવાની છે. (૬)

હે વત્સ! સમસ્ત ભાવને જાણનાર એવા તને કહેવાનું કેટલું હોય? માટે એવી રીતે પ્રવર્ત્તજે કે મોક્ષસુખ સત્વર પામે' (૭)

एत्थंतरंमि नीसेससयणवग्गेण परिगओ राया।
आणंदामंदगलंतनयणबाहप्पवाहेण ।।८।।

अभिवंदिऊण चरणे जिणिंदसिरिवद्धमाणसामिस्स।
एगंतमवक्कंतो दुस्सहविरहग्गिसंतत्तो ।।९।। जुम्मं।

कुलमयहरियावयणं तहत्ति पडिसुणिय जिणवरो वीरो।
सयमेव पंचमुट्ठियलोयं काउं समारद्धो ।।१०।।

ते य केसे सामिकरयलपल्हत्थिए सुरिंदो नियदेवदूसंचलेणं ईसिविणमियसरीरो सम्मं पडिच्छइ, कमेण य निव्वत्तियंमि लोयकम्मे जिणं अणुन्नविऊण तं कुंतलकलावं मेहपडलं व सामलं, दुज्जणहिययं व कुडिलं खीरोयसलिले पक्खिवइ, दिव्वतूरनिनायं मणुस्समंगलुग्गारहलबोलं च निवारेइ। अह मग्गसिरकिण्हदसमीए पच्छिमण्हसमए हत्थुत्तरनक्खत्ते वट्टमाणे सयमेव

अत्रान्तरे निःशेषस्वजनवर्गेण परिगतः राजा।
आनन्दाऽमन्दगलन्नयनबाष्पप्रवाहेन ।।८।।

अभिवन्द्य चरणयोः जिनेन्द्रश्रीवर्धमानस्वामिनः।
एकान्तमपक्रान्तः दुःसहविरहाऽग्निसन्तप्तः ।।९।। युग्मम्।

कुलमहत्तरवचनं तथेति प्रतिश्रुत्य जिनवरः वीरः।
स्वयमेव पञ्चमुष्टिकलोचं कर्तुं समारब्धवान् ।।१०।।

तान् च केशान् स्वामिकरतलपर्यस्तान् सुरेन्द्रः निजदेवदूष्याऽञ्चलेन इषद्विनामितशरीरः सम्यक् प्रतीच्छति, क्रमेण च निर्वर्तिते लोच(=केशलुञ्चन)कर्मणि जिनम् अनुज्ञाप्य तं कुन्तलकलापं मेघपटलमिव श्यामम्, दुर्जनहृदयमिव कुटिलं क्षीरोदकसलिले प्रक्षिपति, दिव्यतूरनिनादं मनुष्यमङ्गलोद्गारकलकलं च निवारयति। अथ **मृगशीर्षकृष्णदशम्याः** पश्चिमाहन्समये हस्तोत्तरनक्षत्रे वर्तमाने स्वयमेव सम्बुद्धः भगवान् **'नमोऽस्तु**

એવામાં પોતાના બધા સ્વજનો સહિત, આનંદથી અમંદ અશ્રુ-જળના પ્રવાહને મૂકતો, (૮)

રાજા ભગવંતના ચરણમાં નમી, દુસ્સહ વિરહાગ્નિથી સંતપ્ત થએલ તે એક બાજુ બેઠો. (૯)

એટલે કુલવૃદ્ધાનું પૂર્વોક્ત વચન સ્વીકારતાં ભગવંતે પોતે પાંચ મુષ્ટિથી લોચ કર્યો. (૧૦)

ત્યાં પ્રભુના હાથમાં રહેલા કેશ ઇંદ્રે જરા શરીર નમાવી પોતાના દેવદૂષ્યના છેડામાં લીધા. પછી અનુક્રમે લોચ-કર્મ નિવૃત્ત થતાં પ્રભુની આજ્ઞા લઇ, મેઘપટલ સમાન શ્યામ અને દુર્જન હૃદયની જેમ કુટિલ તે કેશોને તેણે ક્ષીરસાગરમાં નાખ્યા. ત્યાં દિવ્ય વાદ્ય-નાદ અને મનુષ્યોના મંગલોદ્ગારનો ધ્વનિ બંધ કરવામાં આવ્યો. એટલે **માગશર**ની **કૃષ્ણ દશમી**એ પાછલા પહોરે હસ્તોત્તર નક્ષત્ર વર્તતાં સ્વયંબુદ્ધ પ્રભુ પોતે-'સિદ્ધોને નમસ્કાર થાઓ! એમ કહી 'હું સામાયિક આદરું છું અને પાપના યોગને ત્રિવિધે ત્રિવિધે વોસિરાવું છું' એ પ્રમાણે ચારિત્ર લે છે.'

संबुद्धो भयवं **'नमोत्थु णं सिद्धाणं'** तिकट्टु 'करेमि सामाइयं सव्वं सावज्जं तिविहं तिविहेणं वोसिरामि' त्ति चारित्तं पडिवज्जए। एत्थ य पत्थावे अंबरतलट्ठिएण भूमितलगएण य देव-देवि-विज्जाहर-नरविसरेण विमुक्को भगवओ चाउद्दिसिंपि झंकारमुहलभसलविलुप्पमाणो, सुगंधियसयलजीवलोओ पिंगलियगयणमंडलो पवरवासचुन्नो, बहलधूमसिहाजालुच्छाइयदिसामुहो ठाणठाणेसु ठविओ डज्झंतागुरु-कुरंगमय-मीणुग्गार-कप्पूरधूवघडियनिवहो, पहयाओ असंखसंखघोसुम्मिस्स-भंभा-मुइंग-मद्दल-काहला-तिलिम-हुडुक्क-ढक्काओ, कओ य निब्भरभरियभुवणंतरालो जयजयारवोत्ति।।

अह चत्तवसण-भूसण-मल्लस्स पुरंदरेण जयगुरुणो।
वामंसतले नसियं अदूसियं देववरदूसं ।।१।।

नीसामन्ने सामन्नगुरुभरे तह जिणेण उक्खित्ते।
काउं साहिज्जंपिव **मणपज्जवणाण**मुप्पण्णं ।।२।।

सिद्धेभ्यः' इति कृत्वा 'करोमि सामायिकं सर्वं सावद्यं त्रिविधं त्रिविधेन व्युत्सृजामि' इति चारित्रं प्रतिपद्यते। अत्र च प्रस्तावे अम्बरतलस्थितेन भूमितलगतेन च देव-देवी-विद्याधर-नरविसरेण विमुक्तः भगवतः चतुर्दिक्षु झङ्कारमुखरभसलविलुप्यमाणः सुगन्धितसकलजीवलोकः पिङ्गलितगगनमण्डलः प्रवरवासचूर्णः, बहुधूमशिखाज्वालोच्छादितदिङ्मुखः स्थानेषु स्थानेषु स्थापितः दह्यमानाऽगरु-कुरङ्गमद-मीनोद्गार-कर्पूरधूपघटितनिवहः, प्रहताः असङ्ख्यशङ्खघोषोन्मिश्र-भम्भा-मृदङ्ग-मर्दल-काहल-तिलिम-हुडुक्क-ढक्काः, कृतश्च निर्भरभृतभुवनाऽन्तरालः जयजयाऽऽरवः।

अथ त्यक्तवसन-भूषण-माल्यस्य पुरन्दरेण जगद्गुरोः।
वामांसतले न्यस्तम् अदूषितं देववरदूष्यम् ।।१।।

निःसामान्ये श्रामण्यगुरुभारे तथा जिनेन उत्क्षिप्ते।
कर्तुं साहाय्यमिव **मनःपर्यवज्ञान**मुत्पन्नम् ।।२।।

આ વખતે આકાશમાં રહેલા તથા ભૂમિતલપર રહેલા દેવ, દેવી, વિદ્યાધર તથા મનુષ્યોએ ભગવંતની ચોતરફ, ઝંકાર કરતા ભમરાને અદૃશ્ય કરનાર સકલ જીવ-લોકને સુગંધી કરનાર તથા આકાશતલને પીળું બનાવનાર એવો પ્રવર વાસક્ષેપ ઉડાવ્યો, તેમજ ભારે ધૂમ-શિખાથી દિશાઓને આચ્છાદિત કરનાર અને બળતા અગરુ, કસ્તૂરી, અંબર, કર્પૂરના ધૂપવાળી ધૂપધાનીઓ સ્થાને સ્થાને મૂકવામાં આવી, અનેક શંખના અવાજથી મિશ્રિત ભંભા, મૃદંગ, મર્દલ, કાહલ, તિલિમ, હુડુક્ક, ઢક્કા વગાડાઈ અને ભુવનના ખાલી ભાગને પૂરનાર જય જયારવ ઉછળી રહ્યો.

એવામાં વસ્ત્ર, ભૂષણ અને પુષ્પને તજનાર એવા ભગવંતના વામ સ્કંધપર પુરંદરે અદૂષિત દેવદૂષ્ય વસ્ત્ર મૂક્યું. (૧)

એમ અસાધારણ શ્રામણ્યનો મોટો ભાર જિનેશ્વરે ઉપાડતાં જાણે સહાય કરવા આવ્યું હોય તેમ **મનઃપર્યવજ્ઞાન** ઉત્પન્ન થયું. (૨)

ओलंबियभुयपरिहो बाढं निक्कसियमोहमाहप्पो।
मेरुव्व निप्पकंपो काउस्सग्गे ठिओ भयवं ।।३।।

चउविहदेवनिकाओ नयरजणो नरवई य नमिऊण।
जयनाहं भत्तीए नियनियठाणे पडिनियत्तो ।।४।।

इय उत्तमगुणगणवद्धमाणसिरिवद्धमाणचरियंमि।
सग्गापवग्गसंगमलच्छीण निवासभवणंमि ।।५।।

गब्भावयार-जम्मण-दिक्खाकल्लाणकहणपडिबद्धो।
संपत्तो पज्जंतं चउत्थओ एस पत्थावो ।।६।। जुम्मं।

इइ सिरिगुणचंदगणिरइए सिरिमहावीरचरिए चउत्थो पत्थावो

अवलम्बितभुजपरिधः बाढं निष्कृष्टमोहमाहात्म्यः।
मेरुः इव निष्प्रकम्पः कायोत्सर्गे स्थितः भगवान् ।।३।।

चतुर्विधदेवनिकायः नगरजनः नरपतिश्च नत्वा।
जगन्नाथं भक्त्या निजनिजस्थाने प्रतिनिवृत्तः ।।४।।

इति उत्तमगुणगणवर्द्धमानश्रीवर्द्धमानचरित्रे।
स्वर्गापवर्गसङ्गमलक्ष्मीणां निवासभवने ।।५।।

गर्भावतार-जन्म-दीक्षाकल्याणकथनप्रतिबद्धः।
सम्प्राप्तः पर्यन्तं चतुर्थकः एषः प्रस्तावः ।।६।। युग्मम्।


इति श्रीगुणचन्द्रगणिरचिते श्रीमहावीरचरिते चतुर्थः प्रस्तावः।

પોતાની ભુજારૂપ પરિધાને અવલંબી મોહના મહાત્મ્યને અત્યંત પરાસ્ત કરનાર અને મેરૂની જેમ નિષ્કંપ એવા સ્વામી કાયોત્સર્ગે રહ્યા (૩)

ચતુર્વિધ દેવો, નગરજનો અને રાજા ભક્તિથી પ્રભુને નમીને પોતપોતાના સ્થાન પ્રત્યે પાછા ફર્યા. (૪)

એ પ્રમાણે ઉત્તમ ગુણ-ગણથી વર્ધમાન, સ્વર્ગ-મોક્ષની લક્ષ્મીના નિવાસભવનસમાન શ્રી વર્ધમાનસ્વામીના ચારિત્રમાં ગર્ભાવતાર, જન્મ અને દીક્ષાકલ્યાણકના કથનવડે પ્રતિબદ્ધ એવો આ ચતુર્થ પ્રસ્તાવ સંપૂર્ણ થયો. (૫/૬)





◆◆ प्रकाशक ◆◆
श्री दिव्यदर्शन ट्रस्ट

ISBN 978-81-925531-1-5

